## नवदशः पाठः

# देशहिताय

**सुधीशः** — मित्र सिद्धार्थ! भवान् कस्यां कक्षायां पठति?

**सिद्धार्थः** — अहं सप्तमकक्षायां पठामि।

**सुधीशः** — एतद् वेशं धृत्वा भवान् कुत्र गच्छति?

**सिद्धार्थः** — मित्र! पश्यतु मम गणवेशम्। अहं बालचरः। अतः जनसेवायै एकं ग्रामं गच्छामि।

**सुधीशः** — 'बालचरः' इत्युक्ते किं ज्ञायते?



**सिद्धार्थः** — बालचरः इति बालानाम् एका सेवासंस्था अस्ति। तस्याः सदस्यः भूत्वा वयं देशसेवां कर्तुं समर्थाः भवामः।

**सुधीशः** — बालचरो भूत्वा भवान् किं किं करोति?

**सिद्धार्थः** — गणवेशधारिणः वयं बालचराः सर्वत्र विचरामः। वयं देवालयेषु मेलापकेषु हट्टेषु जनसमूहेषु सामाजिककार्यक्रमेषु भूकम्पादि आपत्कालेषु च उत्साहेन जनानां साहाय्यं कुर्मः। प्रतिज्ञाः अपि अनुपालयामः।

**सुधीशः** — काः ताः प्रतिज्ञाः?

**सिद्धार्थः** — प्रथमा तु 'ईश्वरं स्वदेशं प्रति च कर्त्तव्यपालनं', द्वितीया तावत् 'सर्वेषां सहायता' तृतीया प्रतिज्ञा 'संस्थायाः अनुशासनस्य पालनम्' इति।

**सुधीशः** — भवन्तं सेवायै कः प्रेरयति?

**सिद्धार्थः** — देशस्तु मातृतुल्यः। मातृसेवायै सर्वे समानयोग्याः। आत्मप्रेरणया एव देशसेवां कुर्मः।

**सुधीशः** — कथमहं देशसेवां कर्तुं शक्नोमि? के ते मार्गाः?

**सिद्धार्थः** — देशसेवायाः बहवः मार्गाः सन्ति। छात्रजीवने 'राष्ट्रियछात्रसेना (एन.सी.सी.)' इति। 'राष्ट्रियसेवायोजना (एन.एस.एस.)' चेति देशसेवामार्गौ।

'एकता अनुशासनञ्च' राष्ट्रियछात्रसेनायाः ध्येयवाक्यम् एवञ्च 'अहं न भवान्' इति राष्ट्रियसेवायोजनायाः ध्येयवाक्यमस्ति। एताभ्यां मार्गाभ्यां वयं व्यक्तित्वविकासेन सह समाजसेवां देशसेवां च कर्तुं शक्नुमः।

**सुधीशः** — छात्रजीवनस्य अनन्तरं देशसेवायाः के मार्गाः?

**सिद्धार्थः** — जल-वायु-स्थलसेना इति त्रिविधसेनाप्रकाराः देशसेवायाः एव मार्गाः सन्ति।

**सुधीशः** — मित्र! एतासां सेनानां विषये किञ्चित् विवरणं ददातु।



**सिद्धार्थः** — जलसेनायाः ध्येयवाक्यं 'शन्नोवरुणः' इति अस्ति। एषा जलमार्गात् देशरक्षां करोति। वायुसेना 'नभः स्पृशं दीप्तम्' इति ध्येयवाक्यं स्वीकृत्य आकाशमार्गात् देशं रक्षति। स्थलसेनायाः ध्येयवाक्यं - 'सेवा अस्माकं धर्मः' इति। एषा स्थलात् देशरक्षणं करोति।

**सुधीशः** — भवतु, ज्ञातं देशहितमार्गाणां विषये; किन्तु एतेषु कः भेदः।

**सिद्धार्थः** — न कोऽपि भेदः। एते सर्वे जाति-धर्म-भाषाभेदरहिताः देशसेवायाः विभिन्नाः मार्गाः वर्तन्ते। सर्वेषामुद्देश्यं तु एकम् एव 'देशहितम्' इति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| धृत्वा | = पहन कर | जनसेवायै | = लोगों की सेवा के लिए |
| मेलापकेषु | = मेलों में | हट्टेषु | = बाजारों में |
| मातृतुल्यः | = माता के समान | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) सिद्धार्थः कस्यां कक्षायां पठति?

(ख) देशः कस्य तुल्यः अस्ति?

(ग) 'शन्नोवरुणः' इति कस्याः ध्येयवाक्यम् अस्ति?

(घ) देशसेवायाः सर्वेषां मार्गाणाम् उद्देश्यं किम्?

(ङ) सिद्धार्थस्य मित्रं कः?

2. **एकवाक्येन उत्तरं लिखत–**

(क) बालचरः इत्युक्ते किं ज्ञायते?

(ख) 'राष्ट्रियछात्रसेनायाः' (एन.सी.सी.) ध्येयवाक्यं किम्?

(ग) सेनायाः त्रिविधप्रकाराः के सन्ति?

(घ) बालचरस्य प्रथमा प्रतिज्ञा का अस्ति?

(ङ) छात्रजीवने देशसेवायाः मार्गौ कौ?

3. **रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) सिद्धार्थः सप्तम्यां कक्षायां पठति।

(ख) गणवेशधारिणः वयं बालचराः स्मः।

(ग) "सर्वेषां सहायता" इति द्वितीया प्रतिज्ञा।

(घ) जलसेना जलमार्गात् देशसुरक्षां करोति।

(ङ) बालचरः एकं ग्रामं जनसेवायै गच्छति।

4. **मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | शन्नोवरुणः | वायुसेना |
| (ख) | एकता अनुशासनञ्च | जलसेना |
| (ग) | नभः स्पृशं दीप्तम् | राष्ट्रियछात्रसेना |
| (घ) | सेवा अस्माकं धर्मः | स्थलसेना |

5. **कोष्ठकात् चित्वा वाक्यानि रचयत–**

| |
|---|
| अहम् |
| भवान् |
| वयम् |

| |
|---|
| पठति, अनुपालयामः, लिखामि। |
| गच्छामि, गच्छति, कुर्मः। |
| प्रेरयति, विचरामः, करोमि। |
| रक्षति, गच्छामः, प्रेरयामि। |
| शृणोमि, भवामः, करोमि। |

6. **उदाहरणानुगुणं रूपाणि लिखत–**

**प्रथमपुरुषः**

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **यथा-** | (वर्तमाने-लट्) गम् | गच्छति | गच्छतः | गच्छन्ति |
| | (आज्ञायां-लोट्) गम् | गच्छतु (गच्छ् + अतु) | गच्छताम् (गच्छ् + अताम्) | गच्छन्तु (गच्छ् + अन्तु) |
| | (क) लिख् | | | |
| | (ख) दृश् (पश्य्) | | | |
| | (ग) वद् | | | |
| | (घ) क्रीड् | | | |
| | (ङ) उपविश् | | | |

**मध्यमपुरुषः**

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **यथा-** | (वर्तमाने-लट्) गम् | गच्छसि | गच्छथः | गच्छथ |
| | (आज्ञायां-लोट्) गम् | गच्छ (गच्छ् + अ) | गच्छतम् (गच्छ् + अतम्) | गच्छत (गच्छ् + अत) |
| | (क) लिख् | | | |
| | (ख) दृश् (पश्य्) | | | |
| | (ग) वद् | | | |
| | (घ) क्रीड् | | | |
| | (ङ) उपविश् | | | |

**उत्तमपुरुषः**

| | धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **यथा-** | (वर्तमाने-लट्) गम्<br>(आज्ञायां-लोट्) गम्<br><br>(क) लिख्<br>(ख) दृश् (पश्य्)<br>(ग) वद्<br>(ङ) उपविश्<br>(घ) क्रीड् | गच्छामि<br>गच्छानि<br>(गच्छ् + आनि) | गच्छावः<br>गच्छाव<br>(गच्छ् + आव) | गच्छामः<br>गच्छाम<br>(गच्छ् + आम) |

**7. कोष्ठके प्रदत्तशब्दैः रिक्तस्थानानि पूरयत–**

(कक्षायां, ग्रामम्, सेवासंस्था, मातृतुल्यः, सेना, बालचराः, ताः प्रतिज्ञाः, मार्गाभ्याम्)

(क) कस्यां ........................ (ख) एकं ........................

(ग) एका ........................ (घ) गणवेशधारिणः ........................

(ङ) काः प्रतिज्ञाः ........................ (च) देशः ........................

(छ) एताभ्यां ........................ (ज) एषा ........................

**योग्यताविस्तारः–**

- **बालचरसंस्थायां षड्वर्षात् आरभ्य षष्टिवर्षपर्यन्तं सेवां कर्तुं शक्नुमः–**

| तत्र बालकानां/पुरुषाणां | योग्यताक्रमः | | बालिकानां/महिलानां योग्यताक्रमः |
|---|---|---|---|
| | वर्षतः + ............ | योग्यता | योग्यता |
| | 6 + ............ | कब | बुलबुल |
| | 10 + ............ | स्काउट | गाइड |
| | 16 + ............ | रोवर | रेञ्जर |

अध्यापकसाहाय्येन अधिकं जानन्तु।

*वयं राष्ट्रे जागृयाम पुरोहिताः।*